National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 11-14
© 2026 NJHSR
www.sanskritarticle.com

**सोमेश कुमार**
शोधच्छात्रः,
शिक्षाशास्त्रम् विभागः (Education),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सोमेश कुमार**
शोधच्छात्रः,
शिक्षाशास्त्रम् विभागः (Education),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# देवीभागवते सम्वर्णितानां आध्यात्मिकशैक्षिकतत्त्वानां प्रासंगिकता

**सोमेश कुमार**

**सारांशः-**

भारतीयसंस्कृतौ आध्यात्मिकशिक्षा मानवजीवनस्य सर्वाङ्गीणविकासस्य मूलाधारः वर्तते। श्रीमद्देवीभागवतमहापुराणम् शाक्तपरम्परायाः प्रमुखः ग्रन्थः अस्ति, यस्मिन् देव्याः स्वरुपं परब्रह्मस्वरूपत्त्वेन, जगज्जननीरुपत्त्वेन च निरूपितमस्ति। अस्मिन् ग्रन्थे भक्ति-ज्ञान-वैराग्य-सदाचार-लोककल्याणादीनां महत्त्वं प्रतिपादितम् अस्ति। अद्यतनसमाजे यदा नैतिकपतनम्, हिंसा, मानसिकचिन्ता, पारिवारिकविघटनं च वर्धते, तदा देवीभागवते प्रतिपादिताध्यात्मिकशिक्षा समाजस्य पुनर्निर्माणे महती भूमिकां निर्वहति।

**मुख्यशब्दाः—** आध्यात्मिकशिक्षा, देवीभागवतम्, समाजः, नैतिकता, भक्तिः, लोककल्याणम्।

**प्रस्तावना-**

आध्यात्मिकशिक्षायाः प्रमुखं उद्देश्यं आत्मस्वरूपस्य ज्ञानप्राप्तिः तथा परमात्मनः साक्षात्काराय अस्ति। भारतीयदर्शने शिक्षा केवलं जीविकोपार्जनस्य साधनं न, अपितु आत्मविकासस्य माध्यमं वर्तते। देवीभागवतपुराणे देवी पराशक्तिरूपेण वर्णिता अस्ति, या समस्तजगतः कारणम् अस्ति। अस्य ग्रन्थस्य शिक्षा मानवेषु सदाचारः, कर्तव्यपरायणता,एवं करुणभावना निर्मातुं समर्थः अस्ति।

**देवीभागवते आध्यात्मिकशिक्षायाः स्वरूपम्-** देवीभागवतानुसारं आध्यात्मिकशिक्षा त्रिषु आधारभूतेषु भक्ति- ज्ञान -वैराग्यतत्त्वेषु प्रतिष्ठिता अस्ति—

**भक्तिः-** देवीभागवतानुसारं भक्तिःत्रिधा भवति। 1.सात्वकीयभक्तिः, 2.राजसीयभक्तिः, 3.तामसीय-भक्तिश्च यथा-

**गुणभेदान्मनुष्याणां सा भक्तिस्त्रिविधा मता ।**
**परपीडा समुद्दिश्य दम्भं कृत्वा पुरः सरम्।।4।।** (स्क.7अ.37)

एवं प्रकारेण अत्र क्रमशः भक्तिलक्षणं प्रतिपादितं वर्तते-

**1.तामसीभक्तिः--**यः परपीडामुदिश्य, दम्भं कृत्वा, मात्सर्येन, क्रोधेन च भक्तिं करोति तस्य भक्तिः तामसी कथ्यते यथा- **परपीडां समुद्दिश्य दम्भं कृत्वा पुरःसरम्।।4।।**
**मात्सर्यक्रोधयुक्तो यस्तस्य भक्तिस्तु तामसी।।5।।***इति।

**2.राजसीभक्तिः-** परपीडारहितं भूत्वा स्वकल्याणार्थं सकामहृदयेन मामुपास्यते तस्य उपासना राजसीभक्तित्वेन गृह्यते यथा-

**परपीडादिरहितः स्वकल्याणर्थमेव च।।5।।**
**नित्यं सकामो हृदयं यशोर्थी भोगलोलुपः।**
**तत्तत्फलसमावास्यै मामुपास्तेऽतिभक्तितः।।6।।**

**भेदबुद्ध्या तु मां स्वस्मादन्यां जानाति पामरः।**
**तस्य भक्तिः समाख्याता नगाधिप तु राजसी।।7।।**

(दे.भा.स्क.7अ.37)

**3-सात्वकीयभक्तिः-** इयं भक्तिः त्रिसृषु भक्तिषु श्रेष्ठः अस्ति। देवीभागवते प्रोक्तं अस्य लक्षणं यथा - **परमेशार्पणं कर्म पापप्रक्षा-लनाय च।**

**वेदोक्तत्वादवश्यं तत्कर्तव्यं तु मयाऽनिशम्।।8।।**
**इति निश्चित बुद्धिस्तु भेदबुद्धिमुपाश्रितः।**
**करोति प्रीतये कर्म भक्तिः सा नग सात्विकी।।9।।**

अर्थात् यः कर्मणः फलं मह्यं ददाति ,पापक्षयार्थं कार्येषु प्रवृत्तो भवति,वेदाज्ञया कर्म करोति एवं अभेदबुद्धेः आश्रयं नीत्त्वा मां चिन्तयन्ति।एतादृशी भक्तिः सात्विकी भक्तित्वेन प्रतिष्ठिता भवति।अनया भक्त्या आश्रयं नीत्वा जनाः आध्यात्मिकशिक्षायां प्रतिष्ठितो भवन्ति ।इति।

**ज्ञानम्-** ज्ञानं नाम यथार्थतत्त्वस्य बोधः। अज्ञानं सर्वदुःखानां मूलम्, ज्ञानं तु तस्य नाशकम्। अतः शास्त्रे उक्तम्**—"न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।"** श्रीमद्भगवद्गीता

अर्थात् अस्मिन् संसारे ज्ञानसदृशं पवित्रं किमपि नास्ति।

**ज्ञानेन सत्त्वगुणस्य विकासः-**

सत्त्वगुणः शुद्धेः, शान्तेः, दयाविवेकस्य च आधारः अस्ति। यदा मनुष्यः आध्यात्मिकज्ञानं प्राप्नोति, तदा तस्य अन्तःकरणं निर्मलं भवति। भगवद्गीतायामपि उक्तं यथा—

**"सत्त्वात् संजायते ज्ञानम्।" (श्रीमद्भगवद्गीता)**

अर्थात् सत्त्वगुणात् ज्ञानस्य उत्पत्तिः भवति, ज्ञानेन च सत्त्वस्य अभिवृद्धिः जायते।

**देवीभागवतपुराणस्य दृष्ट्या-**देवीभागवते भगवत्याः भक्ति, ज्ञानं, वैराग्यं तथा सदाचारः मोक्षस्य साधनानि कथितानि। देवीकृपया जीवस्य अन्तःकरणं शुद्धं भवति, तदा स आत्मतत्त्वं ज्ञातुं समर्थः भवति। आध्यात्मिकशिक्षा मनुष्यं सत्य-दया-क्षमा-सेवा इत्यादिषु मानवीयगुणेषु प्रवर्तयति।

**ज्ञानस्य विशेषता—**

**1.अविद्याया नाशः भवति।**
**2.विवेकः विकसितः भवति।**
**3.मनः शुद्धं भवति।**
**4.सत्त्वगुणस्य वृद्धिः भवति।**
**5.वैराग्यभावः उत्पद्यते।**
**6.मोक्षमार्गे प्रवृत्तिः जायते।**

अनेन आध्यात्मिक तत्त्वस्य सम्वर्धनं भवति।तस्य ज्ञानस्य स्वरुपं उपाधि शून्यं भवेत्।देवीभागवते प्रतिपादितं यथा-

**आभ्यान्तरा तु या पूजा सा तु संविल्लयः स्मृतः।**
**संविदेव परं रुपमुपाधिरहितं मम।।44।।**

(दे.भा.स्क.7अ.39)

अनेन स्पष्टीयते यत् उपाधिरहितज्ञानमेव परमपवित्रं तथा आत्मज्ञानसम्पादने मुख्यसहायतां जनयति।तेन अध्यात्मतत्त्वस्य विकासः भवति।

**वैराग्यम्-**

देवीभागवतपुराणे वैराग्यं मानवजीवनस्य परमं साधनं मन्यते। यदा मनुष्यः संसारस्य अनित्यता, विषयभोगानां क्षणभङ्गुरता तथा जन्ममृत्युचक्रस्य दुःखमयस्वरूपं सम्यक् अवगच्छति, तदा तस्य अन्तःकरणे वैराग्यभावः प्रादुर्भवति। वैराग्यस्य तात्पर्यं न संसारत्यागः, अपितु विषयेषु अनासक्तिः तथा भगवत्याः चरणयोः दृढभक्तेः स्थापना इति।

देवीभागवते प्रतिपादितं यत् ज्ञानस्य, भक्तेः तथा मोक्षस्य प्राप्त्यर्थं वैराग्यम् अत्यावश्यकम् अस्ति। विषयासक्तचित्तस्य पुरुषस्य आत्मज्ञानं न भवति, किन्तु वैराग्ययुक्तस्य साधकस्य चित्तं शुद्धं भवति तथा स भगवत्याः कृपापात्रं भवति।

**वैराग्यस्य स्वरूपम्-**

**1.विषयेषु अनासक्तिः** — शब्दस्पर्शरूपरसगन्धानां विषयाणां मोहाभावः।

**2.संसारस्य अनित्यत्वबोधः** — धनं, यौवनं, ऐश्वर्यं, शरीरं च नश्वरमिति ज्ञानम्।

**3.भगवत्यां अनुरागः** — सांसारिकविषयेभ्यः निवृत्त्य भगवत्याः भक्तौ प्रवृत्तिः।

**4.मोक्षसाधनत्वम्** — वैराग्यं ज्ञानस्य तथा मोक्षस्य द्वारमिति।

अर्थात् वक्तुं शक्यते यत्- ज्ञानात् वैराग्यं जायते, वैराग्यात् च उत्तमा भक्तिः प्रादुर्भवति।

तथा च**—"अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्।"—** भगवद्गीता 9.33

अस्य भावः देवीभागवतेऽपि प्रतिपादितः यत् अनित्ये संसारे आसक्तिं त्यक्त्वा परमेश्वर्याः उपासनां कर्तव्यम्।एवं देवीभागवतपुराणानुसारं वैराग्यं नाम संसारस्य नश्वरवस्तुषु अनासक्तिः,देविषु दृढभक्तिः, आत्मज्ञानस्य साधनं तथा मोक्षस्य प्रमुखकारणं च। वैराग्येन चित्तशुद्धिः भवति, चित्तशुद्ध्या ज्ञानं, ज्ञानेन च परमकल्याणस्य प्राप्तिर्भवति।अतः आध्यात्मिकशिक्षा केवलं धार्मिकाचारपर्यन्तं न सीमिता, अपितु व्यक्तित्वनिर्माणस्य साधनम् अस्ति।

**नैतिकमूल्यस्थापने आध्यात्मिकशिक्षायाः उपयोगिता-**

समाजस्य स्थैर्यं नैतिकमूल्यानां संरक्षणेन एव सम्भवति। देवीभागवते सत्यं, दया, क्षमा, अहिंसा, परोपकारश्च धर्मस्य

मूलतत्त्वानि कथितानि सन्ति। एवं आध्यात्मिकशिक्षया सत्यपालनस्य प्रवृत्तिर्भवति।सत्यस्य दृष्टान्तं देवीभागवते प्रतिपादितं वर्तते यथा-यदा विश्वामित्रेण सम्पूर्णराज्यस्य दानं स्वीकृतं तद् दशांश दक्षिणा कृते हरिश्चन्द्रपार्श्वे किमपि न अवशिष्टं तदा विश्वामित्रेण उक्तं यथा-

**दक्षिणायाः सुवर्णं मे दत्त्वा गच्छनराधिप।**
**नाहं दास्यामि वा ब्रूहि मया त्यक्तं सुवर्णकम्।।61।।**
**कुतस्ते भविता राजन्धनप्राप्तिरतः परम्।**
**गतं राज्यं तथा कोशो बलं चैवार्थ साधनम्।।5।।**
**तस्मात्कथय भूपाल न दासायामीति साम्प्रतम्।**
**त्यक्त्वाऽऽशां महतीं कामं गच्छाम्यहमतः परम्।।7।।**

उपर्युक्त श्लोकेन ऋषिः विश्वामित्रः सत्यव्रतस्य राज्ञः (हरिश्चन्द्रस्य) परीक्षां गृह्णन् कथयति यत्— हे नराधिप! मम यज्ञस्य दक्षिणास्वरूपं सुवर्णं मह्यं दत्त्वा इतः गच्छ, अथवा "अहं न दास्यामि" इति स्पष्टं वद। इदानीं तव राज्यं, कोषः, सैन्यबलं, धनार्जनस्य साधनानि च सर्वं नष्टं जातम्, अतः इतः परं तव धनप्राप्तिः कुतः भविष्यति? तस्मात् कारणात् त्वं साम्प्रतम् "अहं दातुं न शक्नोमि" इति वद, येन अहम् अपि सुवर्णस्य महतीं आशां त्यक्त्वा इतः प्रगमिष्यामि। अत्र आपत्काले अपि राज्ञः प्रतिज्ञापालनाय तस्य सत्यनिष्ठायाः दृढता परीक्षिता अस्ति।एतादृशीं वार्तां श्रुत्वा हरिश्चन्द्रेण उक्तं यत् तद् सत्यव्रतस्य परिपालने अद्वितीयमस्ति यथा-

**मम देहोऽस्ति भार्यायाः पुत्रस्य च ह्यनामयः।**
**क्रीत्वा देहं तु तं नूनमृणं दास्यामि ते द्विज।।10।।**

एवं सर्वस्वं दत्त्वा सत्यस्य संरक्षणं कृतवान्।इत्यादि कथनेन सत्यस्य महत्ता इतोऽपि वर्धते।

**मानसिकशान्तौ आध्यात्मिकशिक्षायाः योगदानम्-**

वर्तमानकाले मानसिकतनावः, चिन्ता, अवसादश्च मानव-जीवनस्य प्रमुखसमस्याः सन्ति। देवीभागवते ध्यानस्य, जपस्य, भक्तेः च महत्त्वं प्रतिपादितम् अस्ति।देवीभक्त्या मनसः एकाग्रता, भयस्य निवारणं,आत्मविश्वासश्च वर्धते।मानसिकशान्तिप्राप्त्यर्थं आध्यात्मिक-शिक्षा महती भूमिका निर्वहति यथा-

**सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।**
**शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥**

अयं श्लोकः भक्तानां मनसि श्रद्धां शान्तिं च जनयति।

**सामाजिकसमरसतायां आध्यात्मिकशिक्षायाः उपयोगिता-**

देवीभागवते सर्वेषु भूतेषु एकस्याः पराशक्तेः अस्तित्वं स्वीकृतम् अस्ति। अतः जाति-धर्म-वर्ण-लिङ्गादिभेदाः गौणाः भवन्ति। आध्यात्मिकशिक्षया सामाजिकैकता,सहिष्णुता, परस्परप्रेमभावाः विकसिताः भवन्ति, एवं विश्वबन्धुत्वस्य भावना पुष्यति यथा-

**या देवी सर्वभूतेषु मातृरूपेण संस्थिता।**
**नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥**

अयं श्लोकः सर्वेषु जीवेषु देवीस्वरूपदर्शनस्य प्रेरणां ददाति।

**नारीसम्मानस्य संवर्धने आध्यात्मिकशिक्षा-**

देवीभागवतस्य विशिष्टः संदेशः नारीशक्तेः गौरवप्रतिष्ठा अस्ति। अस्मिन् ग्रन्थे स्त्री साक्षात् शक्तिस्वरूपा कथिता अस्ति यथा-

**विद्याः समस्तास्तव देवि भेदाः।**
**स्त्रियः समस्ताः सकला जगत्सु॥**

अस्याः शिक्षायाः फलस्वरूपं समाजे स्त्रीसम्मानः, स्त्रीशिक्षा, स्त्रीसशक्तिकरणं च वर्धते।

**पर्यावरणसंरक्षणे आध्यात्मिकशिक्षायाः महत्त्वम्-**

देवीभागवते प्रकृतिरुपा देव्याः स्वरूपम् प्रतिपादितम्। पृथ्वी, जलम्, वायुः, अग्निः, आकाशः च पूजनीयाः मत्वा संरक्षिताः भवन्ति।

**आध्यात्मिकशिक्षा—** 1.पर्यावरणसंरक्षणस्य चेतनां जनयति।
2. प्राकृतिकसंसाधनानां सदुपयोगं शिक्षयति।
3.जीवेषु करुणाभावं वर्धयति।
4.लोककल्याणे सेवा-भावनायाश्च विकासः

देवीभागवतस्य शिक्षा केवलं व्यक्तिगतमोक्षाय न, अपितु समाजकल्याणाय अपि प्रेरयति।एवं दानशीलता, परोपकारभावना, सेवाधर्मस्य प्रतिष्ठा,समाजे सहयोगभावश्च वर्धते।

एवं समाजः अधिकः मानवीयः, संवेदनशीलः च भवति।

**वर्तमानसमाजे प्रासङ्गिकता-**अद्य समाजः भौतिकवादस्य प्रभावेण नैतिकमूल्यानां ह्रासं, पारिवारिकविघटनं, हिंसां, पर्यावरणसंकटं च अनुभवति। एतेषां समस्याणां समाधानं केवलं भौतिकोपायैः न सम्भवति।

**देवीभागवतस्य आध्यात्मिकशिक्षा—**

**1.नैतिकमूल्यानि सुदृढीकरोति**- सत्यनिष्ठा धर्मश्च (Truth and Righteousness): इयं शिक्षा मनुष्यं स्वार्थं त्यक्त्वा सत्यस्य धर्मस्य च मार्गे चलितुं प्रेरयति, येन समाजे परस्परं विश्वासः वर्धते।

सदाचारः आत्मानुशासनं च (Self-Discipline): आध्यात्मिकज्ञानेन मनुष्यः काम-क्रोध-लोभादि-विकारेषु नियन्त्रणं प्राप्नोति। एषः आत्मानुशासनः एव नैतिकजीवनस्य मुख्यो आधारः अस्ति।

निःस्वार्थकर्म (Selfless Action): भगवद्गीतायाः निष्कामकर्म-योगस्य शिक्षया मनुष्यः फलस्य आशाम् अकृत्वा समाजकल्याणाय कार्यं करोति, यत् नैतिकमूल्यानां चरमं रूपम् अस्ति।

अतः वक्तुं शक्नुमः यत् आध्यात्मिकशिक्षा केवलं ज्ञानं न ददाति, अपितु मनुष्यस्य अन्तःकरणं शुद्धं कृत्वा तं चरित्रवान्, संवेदनशीलम् च करोति। एषा एव नैतिकमूल्यानां वास्तविकं सुदृढीकरणं करोति।

**2.मानसिकशान्तिं प्रददाति-** आध्यात्मिकशिक्षा मनुष्यस्य अन्तःकरणं शुद्धं करोति, येन मानसिकशान्तिः स्वतः एव जायते। इयं शिक्षा अस्मान् पाठयति यत् संसारे सुख-दुःखे, लाभ-हानी च अनित्ये स्तः, अतः आपत्काले अपि मनुष्येण विचलितं न भवितव्यम्।

भगवद्गीतायाः निष्कामकर्मयोगस्य शिक्षया जनः फलस्य चिन्तां त्यक्त्वा केवलं कर्मणि ध्यानं ददाति, येन भविष्यस्य भयम् व्याकुलता च नश्यति। आध्यात्मिकज्ञानेन मनुष्यः काम-क्रोध-लोभ-मोह-आदि विकारेभ्यः मुक्तः भूत्वा आत्मनि सन्तोषं प्राप्नोति। यदा मनसि ईर्ष्या-द्वेषौ न भवतः, तदा परमशान्तिः स्थिरता च प्राप्यते। संक्षेपतः, आध्यात्मिकशिक्षा मनुष्यं बाह्यपरिस्थितिभ्यः अप्रभावितं कृत्वा आन्तरिकानन्दं ददाति।

**3.सामाजिकसमरसतां वर्धयति-** आध्यात्मिकशिक्षा समाजे भेदभावादि-भावनां दूरीकृत्य सामाजिकसमरसतां दृढतापूर्वकं वर्धयति। इयं शिक्षा मनुष्यं पाठयति यत् संसारे प्राणिमात्रे एका एव आद्याशक्तिः (परमात्मा) समाहिता अस्ति। यदा मनुष्यः अन्येषु अपि स्ववद् भावं पश्यति, तदा जाति-वर्ण-वर्गभेदं विस्मृत्य भ्रातृभावः सौहार्दं च स्वतः एव उत्पद्यते।

श्रीमद्देवीभागवतमहापुराणस्य तृतीयस्कन्धे, पञ्चमे अध्याये भगवती दुर्गा स्वयं ब्रह्माणं प्रति अभेदभावस्य सामाजिकसामंजस्यस्य च दिव्यं सन्देशं ददाति—

**सदैकत्वं न भेदोऽस्ति सर्वदैव ममास्य च।**
**योऽसौ साहं अहम् योऽसौ भेदोऽस्ति मतिविभ्रमात्॥**

(दे.भा. स्क. 3 अ. 5श्लो.2)

अर्थात् भगवती कथयति यत् मयि संसारे सर्वदा एकत्वमेव अस्ति, कोऽपि भेदः नास्ति। यः परमात्मा अस्ति सा एव अहम्, या अहम् अस्मि सः एव सः अस्ति। समाजे जनैः यः भेदः क्रियते, सः केवलं तेषां बुद्धिभ्रमात् एव भवति।एवं मानवतावादस्य प्रचारं करोति।अतः अस्याः शिक्षायाः आवश्यकता अद्य अधिकतया अनुभूयते।

**उपसंहारः--**देवीभागवतपुराणे प्रतिपादिता आध्यात्मिकशिक्षा व्यक्तेः समाजस्य च समुन्नत्यै अत्यन्तोपयोगिनी अस्ति। सा नैतिकमूल्य-विकासाय, मानसिकशान्तये, सामाजिकसमरसतायै, नारीसम्मानाय, पर्यावरणसंरक्षणाय, लोककल्याणाय च प्रेरणां ददाति। यदि एताः शिक्षाः व्यवहारजीवने सम्यक् अनुपालिताः स्युः, तर्हि आदर्शः, शान्तिपूर्णः, नैतिकाश्च समाजः निर्मातुं शक्यते।

**सन्दर्भग्रन्थसूची-**

1.श्रीमद्देवीभागवतमहापुराणम्, गीता प्रेस, गोरखपुर।

2.देवीमहात्म्यम्, मार्कण्डेयपुराणान्तर्गतं।

3.स्वामी जगदीश्वरानन्दः, देवीभागवत-टीका।

4.डॉ. सर्वपल्ली राधाकृष्णन्, भारतीयदर्शनम्।

5.बलदेव उपाध्यायः, संस्कृतसाहित्यस्य इतिहासः।

6.पाण्डुरङ्ग वामन काणे, धर्मशास्त्रस्य इतिहासः।